गं बलिर्दानवनायकः ९८ मेरुशृंगशिखरावर्त्तकृतवातायनस्थितः एकदा चिंतयामास सस्वयं
संसारसंस्थितिं ९९ पुनरालिंग्यते कान्ता पुनरेव च भुज्यते सेयं शिशुजनक्रीडा लज्जायै म
हतामिह १०० तमेव भुक्तविरसं व्यापारौघं पुनःपुनः दिवसे दिवसे कुर्वन्प्राज्ञः कस्मान्न लज्ज
ते १ पुनर्दिनं पुना रात्रिः पुनः कार्यपरंपरा पुनःपुनरहं मन्ये प्राज्ञस्यापि विडंबना २ पुराकि
ले ह भगवान्पृष्टोऽभूत्स विरोचनः पितामयात्मतत्त्वज्ञो दृष्टलोकपरावरः ३ यथा सकलदुःखा
नांसुखानांच महामते यत्र सर्वभ्रमाः शान्ताः कोऽसौ मां तदुच्यते ४ क्वोपशान्ता मनोमोहाः क्वा
तीताः सकलैषणाः विश्रामरहितं कुत्र तातविश्रमरोचिरम् ५ तन्ताताऽविहतानन्दसुन्दरां
किंचिदेव मे ताहक्कथय यत्रस्थस्थिरं विश्रान्तिमेम्यहम् ६ स्वर्गीहतस्याङ्कनेनैवोपितस्य क
ल्पतरोर्मूले स्थित्वा विरोचन उवाच अस्ति पुत्रातिविततो देशो विपुलकोटरः त्रैलोक्यानां स
हस्राणि यत्र मान्ति बहून्यपि ७ यत्र नाम्भोधयो नापि सागरा वा न चाद्रयः न वनानि न तीर्थानि
न नद्यो न सरांसि च ८ न मही चापि नाकाशो नघौर्न पवनादयः न चन्द्रार्कौ न लोकेशा न देवा न
च दानवाः ९ एक एवास्ति सुमहांस्तत्र राजा महाद्युतिः सर्वकृत्सर्वगः सर्वः स च तूष्णीं व्यवा

स्थितः ९ तेनसंकल्पितोमंत्रीसर्वसन्मंत्रणोन्मुखः अखंडंघटयत्याशुखंडंविघटयत्यलम्
बलिः आधिव्याधिविनिर्मुक्तः कःसदेशोमहामते कथमासाद्यतेचापिकेनचाधिगतःप्र
भाम् १२ कःसतादृग्विधोमंत्रीराजावापिमहाबलः हेलाल्लङ्घनजगज्जालैर्योस्माभिरव
पिनोजितः १३ विरोचनः सतत्रमंत्रीबलवान्देवासुरगणैःस्तुतः समेतैर्लब्धगुणैतैरपि
नाक्रम्यतेमनाक् १४ नासौसहस्रनयनेनयमेनानयमानयतेम्बरः नामरैर्नासुरैर्वापि।
यदिपुत्रकजीयते १५ नास्यासौनास्त्रशस्त्राणांनभटोद्भवकर्मणाम् तेनदेवासुराः सर्वे
सर्वेदैववशीकृताः १६ अविल्लनापितेनेहहिरण्याक्षादयोऽसुराः पातिताःकल्पवातेनमे
रुकल्पद्रुमाइव १७ समंत्रीकेवलंपुत्रतेनैवप्रभुणायदि जीयतेतत्त्वजेयोसावन्यथात्वच।
लोपमः १८ त्रैलोक्यबलिनामल्लमाक्रान्तजगत्त्रयम् जेतुंचेदस्तितेशक्तिस्तत्पराक्रमवा
नसि १९ पुत्रयुक्त्यागृहीतोसौरणादायातिवश्यताम् युक्तिंविनादहत्येषआशीविषइवो
द्धृतः २० यावन्नदृष्टोराजासौतावन्मंत्रीनजीयते मंत्रीचयावन्नजितस्तावद्राजानदृश्यते
पौरुषेणाप्रयत्नेनसम्भ्रमेणशनैःशनैः इदंसम्पाद्यतेतेनदेशमाभाषितंशुभम् २२ श्रण
कःपुत्रदेशोसौसर्वंप्रकटयामिते देशोनाम्नामयोक्तेस्मिमोक्षं सकलदुःखहा २३ राज्ञा
ततत्रभगवान्नाम्नासर्वपदातिगः तेनमंत्रीकृतःप्राज्ञोमनोनाममहामते २४ तस्मिञ्जि
तेजितेसर्वंसर्वमास्वादितंभवेत् दुर्जयेतद्धिजानीयाद्युक्त्यैवपरिजीयते २५ विषयान्त्र

तिभोः पुत्र सर्वानेव हि सर्वथा अनास्थापरमा ह्येषा सा युक्तिर्मनसो जये २६ अभ्यासेन विना क
ष्टं नाभाति विषयारतिम् अप्यत्यन्तबलो देही देशान्तरमिवागतिः २७ आत्मावलोकनेनैषा
विषयारतिरुत्तमा हृदये स्थितिमायाति श्रीरिवाम्भोजकोटरे २८ तस्मात्प्रज्ञातिकाविरागि
चरिणातिचारुणा देवमालोकयेद्भोगाद्रतिं यावद्धरेत्समम् २९ चित्तस्य भोगैर्द्वौ भागौ शास्त्रे
णैकं प्रपूरयेत् गुरुशुश्रूषया चैकमव्युत्पन्नस्य सत्क्रमे किंचिद्व्युत्पत्तियुक्तस्य भागं भोगैः
प्रपूरयेत् गुरुशुश्रूषया भागौ भागं शास्त्रार्थचिन्तया ३१ व्युत्पत्तिमनुयातस्य पूरयेच्चेतसो
न्वहम् द्वौ भागौ शास्त्रवैराग्ये द्वौ ध्यानगुरुपूजया ३२ भोगसंत्यागसंप्राप्तपरमार्थार्हते
स्तत न ब्रह्मपदविश्रान्तिस्त्वमासाद्यते परम् ३३ पौरुषं यत्नमाश्रित्य देवं कृत्वा सुदूरतः भो
गान्विगर्हयेत्प्राज्ञः श्रेयोद्वाररुद्धार्गलान् ३४ विचारो भोगगर्हातो विचाराद्भोगगर्हणं अ
न्योन्यमेतद्वर्धेते समुद्रजलदाविव ३५ भोगगर्हाविचारस्य सात्मालोकस्य शास्त्रतः अन्यो
न्यसाधयंत्यर्थं स्निग्धाः सुहृदो यथा ३६ देशक्रमेणायनमल्पविगर्हणो न तेनाङ्कसायु।
जनमर्जयमानपूर्वम् तत्संगमात्यविषयायवहेलनेन सम्यग्विचारविभवेन न तवात्मला
भः ३७ बलिः एतन्मे कथितं पूर्वं पित्रा चारुविचारिणा इदानीं संस्मृतं दिष्ट्या संप्रबोध
महं गतः ३८ अहो नु खलु रम्योयं शमभूः शीतलान्तरा सर्वाप्ये वशमं याति सुखदुःख दृ
ष्टा शमे ३९ अंग नमेनसं पीडा मां समासेन चासिधयः पुरा हृ मम वे प्रीतो यन्नमोह विज्र

मिते ५० एतावन्तमहं कालं भ्रंशो बालो भवं पुरा यः कुर्वन्द्वेषममैरेल्लच्छया जगदिच्छया ५१
कोयं तावदहं किंस्यादात्मेत्यात्मावलोकनं इच्छाम्याशनसेनार्थं नमज्ञानशान्तये ५२ बलि
श्चिन्तनेनाविर्भूतं शुक्रमुवाच भोगान्प्रतिविरक्तोस्मि महासंमोहदायिनः तत्त्वं ज्ञातुमि
च्छामि महासंमोहहारि यत् ५३ कियन्मात्रमिदं भोगजालं किमयमेव वा कोहं कस्त्वं किमे
ते वा लोका इति वदाशु मे ५४ शुक्रः बहुनात्र किमुक्तेन खेगंते यत्त वाहनम् सर्वदानवरा
जेन्द्र सारं संक्षेपतः शृणु ५५ चिदिहास्ति हि चिन्मात्रमिदं चिन्मयमेव च चित्त्वं चिदहमेते च
लोकाश्चिदिति संग्रहः ५६ उह जगति चित् अस्ति हि प्रमाणं तस्याः सिद्धेः स्वयं निरपेक्षत्वप्रसिद्धिः यो
तनाय अत इदं चिद्रूपं चिदधीनसिद्धिकं भोगजातं चिदेव मात्रोत्कर्षावधिर्यस्य तद्यथा विधं
यतो वाचो निवर्तन्ते इति श्रुत्या हि सा चिदेव सर्वानन्दोत्कर्षावधिर्लोके चिन्मयमेव चिच्चा
ध्यासात् चिन्मयमेव च एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति श्रुतेः एवं त्वमस्य
हं ब्रह्मास्मि एष ब्रह्मैष इन्द्रः नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोतेत्यादि श्रुतिशतेभ्यस्त्वमहं
मादिभोक्तृतत्त्वमपि चिन्मात्रमेवेत्याह चित्त्वमिति एवं भोग्यजातमपि परमार्थतश्चिदेवेति
मत्वा स्फूर्तीश्चिदधीनत्वाद् हंसे वेदं विश्वमिदं वरिष्ठमित्यादिश्रुतेश्चात्याशयेनाह ते चेति ५६
भव्यास्ति चेत्तदेतस्मात्सर्वमाप्नोषि निश्चयात् नो चेत्तद्धृदि प्राप्तं त्वयि भस्मनि हूयते ५७ चि
त्तचैत्यकलनावन्ध्यमलं नक्षितं किं निरुच्यते चिदचेत्याखिलात्मेति सर्वसिद्धान्तसंग्रहः ५८ चेत्यर

ज्ञनिरिक्ताय विरिक्ताय महात्मने प्रत्यक्चेतनरूपाय स्वरूपाय नमोस्तु ते ४९ चिन्तये चेत्यमुक्ताय यु
क्तायुक्ताय योगण्या सर्वावभासदीपाय मह्यमेव नमोस्तु ते किं संकल्पविकल्पाभ्यां चिन्ते चेद्
यमेकिका संदोभयाम्यहं तावघाम्याम्यात्मनियावने ५१ इति संचिंतयन्नेव बलिः परमको-
विदः ओंकारादर्हमात्रार्थं भावयन्मौनमास्थितः ५२ संशान्तसर्वसंकल्पः प्रशान्तकलनाग
णः निःशंकमपि हृदास्त चेत्यचेतकचिन्तनः ५३ ध्यातृध्येयध्यानहीनो निर्मलः शान्तवासनः
बभूवावातदीपाभो बलिः प्राप्तमहापदः ५४ प्रशमितेषणायापि विषर्णाया मननदोषदशोज्झि-
तयेतया बलिरराजत निर्मलसत्तया विघनमक्षतयेव शरन्नभः ५५ दिव्यवर्षसहस्रेण प्रा-
बुद्धो बलिश्चिन्तयति नवै योस्ति नमो द्योतितमोर्व्यमेद्वयमागतम् किं मे ध्यानविलासेन।
किं चाध्यानेन मे भवेत् ५६ न मे बाञ्छापरे तत्वे न मे वाञ्छा जगत्स्थितौ न मे ध्यानदृशा कार्यं न
कार्यं विभवेन मे ५७ वसिष्ठः बलेर्विज्ञानसंप्राप्तिरेषा ते कथिता मया एतां दृष्टिमवष्टभ्य त्व
मप्यभ्युदितो भव ५८ इत्याद्यैश्च सर्वर्षीणां कोटीर्भुक्त्वा जगत्त्रयम् अन्ते वैरस्यमापन्नो बलिर
प्यन्तरोत्तमः ५९ तस्माद्वपुर्वैरस्य भोगाभोगमिदं संत्यज्य सत्यमानन्दमेव संपदे ब्रा-
ज ६० इदं मिष्टमनिष्टं त्वमनिष्टं चेष्टमित्यपि परिकल्प्य तदभ्यासान्मनतोपि परित्यजे ६१
इष्टानिष्टदृशोस्त्यागे समतोदेति शाश्वती तया हृदयवर्तिन्या पुनर्जन्म न जायते ६२ माघा
हीर यथार्थीते मिथ्यादृष्टिहताशयैः यत्नैः संकल्पविक्रीतैर्विमर्दैः समतां व्रज ६३ अकिं

चनात्स्वनिर्णीतालेवमानात्मरोक्तिषु नमोरव्यादथिकोलोकेकश्चिदस्तीहदुःखदः ६४ आ
त्मनैवप्रयत्नेनयावदात्मावलोकने नकृतोनुग्रहस्तावन्नविचारोदयोभवेत् ६५ विष्णुना
हिरण्यकशिपोर्हतेतज्जयेप्सुः प्रह्लादश्चिन्तयति उपायमेकमेवेमंहरेराक्रमणोत्सुकः स्म
मन्येतस्मृतिरेकेणाविपयतेनप्रतिक्रिया ६६ सर्वात्मनासर्वधियासर्वसंरम्भरंहसा सएवशा
रणोदेवोगतिरस्तीहनान्यथा ६७ अस्मान्निमेषादारभ्यनारायणमजंसदा संप्रपन्नोस्मिस
र्वत्रनारायणमयोह्यहम् ६८ नमोनारायणायेतिमन्त्रःसर्वार्थसाधकः नापैतिममहृत्को
शादाकाशादिवमारुतः ६९ हरिराशाहरिर्व्योमहरिरुर्वीहरिर्जगत् अहंहरिरमेयात्मा
जातेविष्णुमयोह्यहम् ७० अविष्णुः पूजयन्विष्णुंनपूजाफलभाग्भवेत् विष्णुर्भूत्वायजेद्वि
ष्णुमयंविष्णुरहंस्थितः ७१ तद्भक्त्येवंविचिन्त्यैवविष्णुनागत्यवरेप्सुहीन्युक्तेप्रह्लादउवाच सर्वसंक
ल्पफलदसर्वलोकान्तरस्थित यदुदारतमंचित्तेतदेवादिशमेविभो ७२ भगवान् सर्वसंभ्र
मच्छेदशान्त्यैपरमायफलायच ब्रह्मविश्रान्तिपर्यन्तोविचारोस्तवानघ ७३ प्रह्लादः विचार
वानेवभवान्भवतीतिभवारिणा देवेनोक्तोस्मितेनान्तःकरोम्यात्मविचारणम् ७४ भवभो
तिकेभ्योविविच्यात्मानमनुभवन्वदति चेत्यवर्जितचिन्मात्रमहमेषावभासकः सवाह्या
भ्यन्तरव्यापीनिष्कलामलसन्मयः ७५ अनेनचेतनेमेसर्वेघटपटादयः सूर्यान्ताश्चावभा
स्यन्तेदीपेनान्तमतेजसा ७६ मयिस्फारेचिदादर्शेप्रतिबिंबंयदागतम् तदस्तिनेतरद्यस्मा

उप.प्र.
४५

त्मेनोत्पन्नेह विद्यते ७७ यद्यत्किंचिदिदं दृश्यं जगत्स्थावरजंगमम् सर्वं संकल्परहितं तच्चिन्नत्व
महेश्वरे ७८ भवानयमयं चाहमिति मिथ्यैव विभ्रमः को देहः कोप्यदेहो वा को मृतः कश्च जीव
ति ७९ दारुवारिदृषन्मात्रे ललितो यो धरातले धिग्वराकमनात्मज्ञं तं कृदानवकीटकं ८० व
नदुर्गे दारुणा जलदुर्गे वा गिरिदुर्गे चरत्यदो मिन्दन्नी विपत्तिशरणा यत्र स्वामित्वाभिमाने
नैलाल्लतां गतः कीटकानां दारुवारिदृषद्भित्त्वा सादर्शनात् दृषत्स्वपि पुत्तलिकादीनां दर्श
नात् स्वविग्रहैकात्म्यभिद्गुब्धैर्विद्यामयमेतकम् अज्ञेनमत्तं पश्यतां किं नाम गुरुणा कृतम् व
र्षाणां कति चिन्त्याप्य जगच्छ्रीमतिकामिनाम् किं नाम प्रापदुचितं हिरण्यकशिपुः किला
वराकाः पेलवधियो वभ्रंशुर्मे पितामहाः येषामाज्यमिदं त्यक्त्वा दैन्यमिरिभवभ्रमिषु ८२ अन
न्तानन्तसंभोगापरोपशमशालिनी शुद्धे येचिन्मयी दृष्टिर्जयत्याखिलदृष्टिषु ८३ सर्वभावा
न्तरस्थाय चेत्यमुक्तचिदात्मने प्रत्यक्चेतनरूपाय मह्यमेव नमो नमः ८४ अनास्वादितमाना
न्तं जगद्राज्यशतान्यपि समास्वादयतानेह किंचिदास्वादितं भवेत् ८५ परां दृष्टिमिमां त्यक्त्वा
दग्धराज्ये रमेत कः कल्पत्वोक्तं रसं प्राज्ञः कटुनिम्बपयः पिबेत् ८६ आत्मने स्तनमो मह्य
मविच्छिन्नचिदात्मने लोकालोकमर्यादेव चिरेणाधिगतो स्पृहो ८७ परावृष्टोमिलव्योम्नि
प्रोदितोस्मि चिराय च उद्धृतोस्मि विकल्पेभ्यो योस्मि सोस्मि नमोस्तु ते ८८ मह्यं तुभ्यमनन्ताय
मह्यं तुभ्यं शिवात्मने नमो देवाधिदेवाय पराय परमात्मने ८९ गतघनपरिहृत्तामिद्धविंबं

गतकलनावरणो स्वमेवरूपम् स्ववपुषि मन्दितैः स्वयं स्वसंस्थ स्वयमन्दितं स्ववशं स्वयं नमामि ९०
निरहंकाररूपाय स्वप्रसन्नान्तरायच महात्मानन्दसरसे तुभ्यमात्मन्नमो नमः ९१ शान्तेन्द्रियो
ग्रग्राहाय द्वीणचित्तोविवह्नये आनन्दाम्बुदये तुभ्यं महात्मात्मन्नमो नमः ९२ गताहङ्कारमे
घाय शान्ताशाद्राववह्नये महात्मानन्दपोलाय विश्रान्ताय नमो नमः ९३ प्रफुल्लानन्दपद्मा
यशान्तचिन्तामयोर्मये महात्मसन्मानसायात्मंस्तुभ्यमेतन्नमो नमः ९४ हेलान्तकम्पितानन्त
विघ्नप्रासादतिशायिनी परमोपशमोपेता जातेयं मम निर्वृतिः ९५ पश्यन्तमोहवेतालो गता
हंकारराक्षसः कदाशान्तपिकोन्मक्तो जातोस्मि विगतज्वरः ९६ तस्मात्संसारगुरोच्छित्वामस्त
रीरकपंजरात् नजाने क्व गतोड्डीय इ रहंकृतिपक्षिणी ९७ उन्मूलिते घनाज्ञानकुलायं का
यपादपात् नजाने गतउड्डीय क्वाहंभावविहंगमः ९८ स्वसत्तापूरिताशेषविघ्नविघ्नज
नीनभो सर्वत्र लब्धसिनित्यमयुनाक्व पलायसे ९९ आवयोरन्तरे भ्रेदिज्ञं नमव्यवहितान्तर
म् अहेरमयसंपन्नं दिष्ट्या दृष्टोसि वान्धव १०० त्वयि स्थिते मय्यविगतामयात्मनि स्वसंस्थिते
व्यपगतेरागरजने क्वावन्ध नेक्व च विपदः क्व संपदो भवाभवौ क्व घा मनः षेमिशाम्यते १ वसि
ष्ठः इति संचिन्तयन्नेव प्रह्लादः परवीरहा निर्विकल्पपरानन्दसमाधिं समुपाययौ २ एवंव
र्षसहस्राणि पीनात्मा ऽतिष्ठदेकरूपकः शान्तरावाससरस्थैर्यमालीडश्रवचोपले ३ मर्यादापा
लनार्थं विलम्बनायाग्न्वजनार्द्धनिनोत्थापितः प्रह्लादस्तदाज्ञयादैत्यराज्यं चकार श्रीरामः

उप०प्र०

४६

पौरुषेणाप्रयत्नेन सर्वमासाद्यते यदि प्रह्लादस्त्वत्कथं त्वज्ञो नमाधववरं विना ४ वसिष्ठः यद्यद्राघ
वसंप्राप्तं प्रह्लादेन महात्मना तत्तदासादितं तेन पौरुषादेव नान्यतः ५ आत्मा नारायणश्चैव ना-
भिन्नास्तिलतैलवत् नैव वशीलपटवत्कुम्भोमाद्वत्तया ६ कदाचिदात्मनैवात्मा स्वयं-
ध्यानात्प्रबुध्यते कदाचिद्विष्णुदेहेन भक्तिलभ्येन बोध्यते ७ चिरमाराधितोप्येष परमप्रीति
मानपि नाविचारवतो ज्ञानं दातुं प्राप्नोति माधवः ८ मुख्यः पुरुषयत्नात्स्यो विचारः स्वात्म
दर्शने गौणो वरादिको हेतुर्मुख्यहेतुपरो भव ९ पौरुषं यत्नमाश्रित्य आह्लादेन्द्रिय पर्व
ते संसारजलधिं तीर्त्वा पारं गच्छ परं पदम् १० विना पुरुषयत्नेन दृश्यते चेज्जनार्दनः मृग
पक्षिगणं कस्मात्तदासौ नोद्धरत्यजः ११ नहूर्गेर्न गुरोर्नाथानां किंचिदासाद्यते महत् आक्रान्तम
नसः स्वस्माद्यदासादितमात्मनः १२ शास्त्रयत्नविचारेभ्यो मूर्खाणां प्रपलायिनाम् कल्पि-
ता वैष्णवी भक्तिः प्रवृत्त्यर्थं शुभमिष्यते १३ विचारोपशमाभ्यां हि न विनासाद्यते हरिः विचारो
पशमाभ्यां च मत्तः किं स्यात्तु केशवात् किं १४ विचारोपशमोपेतं चित्तमाराधयात्मनः तस्मिन्सिद्धे
भवान्सिद्धो नो चेद्वनगर्दभः १५ हरिरूपावासि चित्तं त्वं मुख्यमानानतेन वपुः शंखचक्रगदा-
हस्तो गौणाख्याकारश्चात्मनः यो हि मुख्यं परित्यज्य गौणं समनुधावति त्वत्कारमायनेसिद्धं
साध्यं संसाययत्यसौ १७ रामापर्यवसाने यमायातं स्मृतिनामिका आत्मचित्तजयेनैवद्व
यमायाति नान्यथा १८ कोशलदेशीयो गाधिर्ब्राह्मणस्त्वाराधिताद्विष्णोर्वरं प्राप्य सरोन्त

४६

46

रत्नमर्घगणार्थं निमज्जन्मनसि मायामयीं स हरिं निरीक्ष्य पुनस्तामेव प्रत्यहं तेन पश्यन्नन्ते दिहानो भूयो वि
स्मृत्वाराध्य प्रत्यक्षीकृत्योवाच भ्रान्तोऽस्मि देवषण्मासान्भूतकीरजनास्पदम् तत्र व्यभिचरत्य
स्मद्वृत्तान्तो न कथास्वपि १९ मायया भूतमभ्रं दृष्ट्वा त्वयेत्युक्तोऽस्मि किं प्रभो मोहनाशाय महतां वचो
नो मोहहेतवे २० भगवान् काकतालीययोगेन चेतसि स्वप्नवत्स्थितिः सर्वेषां भूतकीराणाम
वेव प्रतिबिम्बति २१ ते नोऽगतवद्वृत्तान्तं यथावत्कथयन्ति ते प्रतिभासो न यातीति पुनर प्रतिभास
नाम् २२ केनचिच्छ्वपचेनान्ते ग्रामस्य रचितं गृहम् तत्त्वया दृष्टमाविष्टसिद्धकारणतां ग
तम् २३ कदाचित्प्रतिभैकैव बहूनामपि जायते काकोलतालस्थितिवद्विचित्राहि मनोग
तिः २४ तथाहि बहवः स्वप्नमेकं पश्यन्ति मानवाः स्वापभ्रमदमैवेयमदमन्यद्रचितवत् २५
योऽसौ कटञ्जको नाम श्वपचो भूतमण्डले तेनैव सन्निवेशेन सत्तथैवाभवत्पुरा २६ तथैव कि
ल त्वं प्राप्य देशान्तरे—तः बभूव कीरवपतिः प्रविवेशानलं ततः भवतः केवलं चित्ते जला
तर्वह्निनसस्तथा प्रतिभाता तथाभूता कटञ्जाचारसंस्थितिः २७ दृष्टानुभूतमप्यर्थं कदाचिद्धि
स्मरत्यलम् कदाचिदप्यदृष्टं तु चेतः पश्यति दृष्टवत् २८ यथा स्वप्नमनोराज्ययात्रासंस्थिति
तिविभ्रमाः जाग्रत्यपि तथैवांग दृष्यं ते मनसा स्वयं २९ भविष्यद्भूतकालस्थ यथा त्रैकाल्यदर्शि
नः प्रतिभामेति गाधे यकरञ्जाचरितं तथा ३० अयं सोऽहमिदं तन्म इति मज्जति नात्मवान् अ
यं सोऽहमिदं तन्म इति मज्जत्यनात्मवान् ३१ सर्वमेवाहमेवेति तत्त्वज्ञो नावसीदति नग्रहणा।

ग्रं ३प ८

तिपदार्थेषु विभागानर्थभावनाम् ३२ तेनासौ भ्रमयोगेषु सत्स्वदुःखविलासिषु न निमज्जति मग्नेना
पि तुम्बीपात्रमिवांभसि ३३ ज्ञानस्यापरिपूर्णत्वान्नशक्नोषि मनोभ्रमं विनिवारयितुं मे च मनः सा
म्यग्यत्नवानिव ३४ चित्तनाभिः किलास्येह मायाचक्रस्य सर्वतः स्थीयते चेत्तदाक्रम्य तन्न किंचि
न्मबाधते ३५ त्वमत्र तिष्ठ गिरेः कुञ्जे दशवर्षाण्यपरिवृत्तधीः मयः कुरु ततो ज्ञानमनन्तं समवा
प्स्यसि ३६ इत्युक्त्वा पुण्डरीकाक्षः स्वैरेवान्तरधीयत गाधिर्विवेकवशजं वैराग्यपदमागतः
निरस्ताशेषसंकल्पस्तपस्तेपे चकार ह दशवर्षाणि तेनासावात्मज्ञानमवाप ह ३८ अवमत
तदनन्तं प्राप्य सन्तोषं महात्मा ह्यपगतभयशोको भोगभूमावनीषु सततमुदितजीवन्मुक्त
रूपः प्रशान्तः सकलरवशभ्रान्तो पूर्णतापूर्णचेताः ३९ तस्माद्रामचन्द्र संत्यज्य तीर्थदानतपः
क्रियाः श्रेयसे परमायान्तस्थितेमेव वशं कुरु ४० वर्तमानमनायासं भज बाह्यमपि यात्वयं
भूतं भविष्यद्भजन्याति चित्तमचित्तताम् ४१ स्वभावमालोकयतस्त्वानन्दाद्धयतां स्थितेः रमा
यनमपि स्वादु रामप्रतिविषायते ४२ यथा विवरकीटेभ्यो गर्दभेभ्योऽपि मानवाः तिर्यग्भ्यश्चा
प्यतनवज्ञा राम तज्ज्ञनरास्मृताः ४३ हृदा दातमस्तत्तां याति चित्तेऽपीवरतां गते आलोकलक्ष्मीर
भितो महामेरुरिवास्थिते ४४ भोगाभोगातिरस्कारैः कार्श्यं नेयं प्रयत्नेन मनः रसापहारैस्तज्ज्ञो
न कालेनाजीर्णीयणीवत् ४५ अनात्मन्यात्मभावेन देहमात्रास्थयानया पुत्रदारकुटुम्बेषु
चेतोग— तिपीनताम् ४६ अहंकारविकारेणाममतामलहेलया इदं ममेति भावेन चेतो

८७

गच्छतियीनतां ४७ अथिव्याधिविलासेनसमाश्वासेनसंस्तुतैः हेयादेयप्रयत्नेनचेतोगच्छतियी
नताम् ४८ होहेनधनलाभेनलाभेनमणियोषिताम् आपातरमणीयेनचेतो॰ ४९ दुरा
शाहीरपानेनभोगानिलबलेनच आच्छादनेनचारेणाच्चिन्नाहिर्यानि यीननताम् ५० तान्था
मादनसान्द्रस्थलपल्लीग्राम विवेकउद्दालकोमुनिरितिचिंतयामास कदाहंत्यक्तमनने
पदेपरमपावने चिरंविश्रान्तिमेष्यामिमेरुशृंगइवाम्बुदः ५१ कदाशममुपेष्यतिममा
न्तर्भोगसंविदः आलोलकल्लोलरवाऊर्मयोम्बुनिधाविव ५२ इदं कृत्वेदमप्यन्यत्कर्तव्य
मितिकल्पनाम् कदान्तर्विहसिष्यामिपदविश्रान्तयाधिया ५३ कदाविकल्पजालंमे
नलगिष्यतिचेतसि स्थितमप्युज्झितासंगापयःपद्मदलेयथा ५४ कदावकुलकल्लोलानावा
परमयाधिया पारितीर्णोभविष्यामिमत्तोन्तस्तातरंगिणीम् ५५ कदेमांजागतैर्भूतैःक्रिय
माणामसन्मयीम् क्रियामपहसिष्यामिबाललीलामिवाकुलाम् ५६ कदोपशान्तमनना
मोधरणीधरकन्दरे समेष्यामिशिलासाम्यंनिर्विकल्पसमाधिना ५७ कदामेमानमातङ्गः
स्वाभिमानमहामदः सत्तावबोधहरिणाहूतोनाशमुपेष्यति ५८ निरंशध्यानविश्रान्तेर्मूक
स्यममर्मूर्धनि कदातार्णकरिष्यन्तिकुलायंवनचूर्णिकाः ५९ कदानिःशङ्कमुरसिध्या
नधीरधियःखगाः ममविश्रांतिमेष्यन्तिशैलस्याराबलस्थितेः ६० इतिचिन्तापरवशोवना
उद्दालकोद्विजः पुनःपुनस्तत्पविशन्ध्यानाभ्यासंचकारह ६१ विषयैर्नीयमानेनत्चित्तेनमर्क

ग्रं॰
उप॰
४८

48

दृढञ्ज्वले न स लेभे समाधानप्रतिष्ठां प्रीतिदायिनीम् ६२ कदाचिद्बाह्यसंस्पर्शपरित्यागादनंतरं।
तस्यागच्छन्विलं कपिः प्रोद्वेगं सत्त्वसंस्थितौ ६३ कदाचिदान्तरान्स्पर्शान्धीरस्त्यज्य मनःकपिः।
लोलत्वान्नस्य संयातो विषयं विषदग्धवत् ६४ कदाचिदुदितार्काभं तेजो दृष्ट्वांतरे मनः विष।
योन्मुखतां यातं तस्य तामरसेक्षणा ६५ आन्तरे हार्देन ब्रह्मणा उदितार्काभं तेजो दृष्ट्वा तथा च
श्रुतिः नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनाम् एतानि रूपाणि पुरःस
राणि ब्रह्मण्यभिव्यक्तिकराणि योगे इति ६५ आन्तरान्धतमस्त्यागं कृत्वा विषयलंपटं तस्या
द्वीयमनो याति कदाचिन्नलपद्विवत् ६६ आन्तरस्यान्धतमसोऽज्ञानान्धकारस्येईषद्ब्रह्मा
भिव्यक्त्यात्यागमीषन्मध्यमं कृत्वा तदानीमेव विषयवासनो द्योयान्नलं पदं वभ्रवेत्यर्थः वाह्या
नाभ्यंतरान्स्पर्शांस्त्यक्त्वा निद्रां च तन्मनः न मलेजान्तिके लेभे कदाचिच्छाम्यतीं स्थितिम् ६७
तमसोऽज्ञानस्य तेजसश्चात्मज्योतिषश्चान्तराले संधौ लीने सन्निद्रयेव शाम्यंतीं चिराद्दृढां
स्थितिं लेभे ६७ अथ पर्याकुलमतिर्विजहारमुनिर्गिरौ प्रत्यहं दिवसार्थी शोमहामेरा।
विवेककः ६८ समलभत दृष्ट्वा पापमेकदा प्रापकन्दराम् संशान्तसर्वसंचारां मुनिर्मोद्व
दशामिव ६९ स तत्रोपाविशद्धृतीश्वतमसलनतो नयन् अन्तःश्रुद्धव पुंःस्थेगेऽक्षरम् क
उवां बुदः ७० बुद्धवत्म दृढं वद्धपद्मासनउदङ्मुखः पादिमिभ्यो हृषाणो धृत्वा चकार ब्रा
ह्ममञ्जलिं ७१ वासनाभ्यः समाहृत्य मनो निर्गमपत्तनम् निर्विकल्पसमाध्यर्थं चका

रेमाविचारणाम् ७२ अयिमूर्खमनः कोर्थस्तव संसारवृत्तिभिः यीमन्तो नतिषेवन्ते पर्यन्ते दुः
खदांक्रियाम् ७३ अनुयावत्ति यो भोगांस्त्यक्त्वा शमरसायनम् संत्यजमंदानवनं स याति वि
षजंगलम् ७४ यद्दियासि महीं रंध्रं ब्रह्मलोकमथापि वा तन्न निर्वाणमायासि विनोपशमा
नामृतम् ७५ शाब्दादिकाभिरेताभिः किंमूर्ख विहृतवृत्तिभिः भ्रमस्य विरतं व्यर्थमेतेमे हृद्विका
यथा ७६ यस्मात्किंचिदवाप्तोषि यस्मिन्नहमिति निवृत्तिम् तस्मिंश्चेतः शमे मूर्ख नानेव भ्रासि
किंपदम् ७७ करोम्यथ किमर्थं वा तदनुशासनम् विचारणावतः पुंसश्चिन्तमस्ति हि नानघ
पादाग्रुणाच्छिरो यावत्कराणाः प्रविचारितम् न लब्धो सावहं नामकः स्यादहमिति स्थितः ७८
संदेहि वातशक्ती नाम ववोयो महाचितः जरामृति स्वकायेस्मिन्को सावहमिति स्थितः ८० अस्या
ऽथ्यमालोकनेवक्त्र यदि चूनम्रवनागतम् तदहं नामको सोस्याद्योस्मिन्दुःखेन मोहितः ८१
स्पर्शनाय निजे तत्त्व यदि जातात्वगुन्म्रवीत को ये स्यादहं नाम ऊपिशाचश्चोदितः ८२ रसे
ष्वभिनिषक्तेस्मिन्स्वकर्मे रसनेन्द्रिये अहं मूढ भ्रमा त्येष कृतस्य कृत्सितो भ्रमः ८३ शब्दृश
क्ति गजेश्रोत्रे वराके स्वार्थपीडिते तदहंकारदुःखस्य निर्वीजस्य कथ्रागमः ८४ आतेभारिवे
न निजे घ्राणे स्वगन्धमागते अहं घ्रातेति यो मानान्तचोरैनैववेम्यहम् ८५ कामनाहीनमप्ये
तत्त्वक्त्वादीन्द्रियेः स्वतः प्रवर्तन्ते बहिः स्वार्थे वासनाव्यकारणाम् ८६ तस्मान्मूर्खाणीन्द्रिया

उप॰ प्र॰
५९

णीत्यक्तान्तर्वासनो निजाम् कुरुध्वं कर्म हे सर्वे मद्दुःखं समवाप्स्यथ ८७ नष्टा ये ये विनष्टाः स्थ व्यर्थमि
न्द्रियबालकाः कोशकारकृमेर्मत्तेन नेव स्वयं भवा ८८ विषविषयविशूचिकामनन्तानि पुराम
हंस्थिति वासनामया स्म अभिमतपरिहारमेत्र युक्त्या भवविभवो भगवानिभयामभूमिः ८९ अ
हंकारभ्रमस्यास्य जातस्याकाशवर्णवत् अपुनः स्मरणं मन्ये नूनं विस्मरणो वरम् ९० समूलं सं
परित्यज्य चिरायाहंकृतिभ्रमम् तिष्ठाम्यात्मनि शान्तात्मा शरन्नभः शरदीव खे ९१ परमात्मानले दीप्ते
ऽसंहुत्वावयवं स्वयम् दग्ध्वात्मानमलं चित्ते शुद्धतामेति शाश्वतीम् ९२ संकल्पपादपं तृष्णाल
तं छित्वा मनोवनम् विततां भवमामासाद्य विहरामि यथासुखं ९३ यदर्थं किल भोगश्रीर्वाञ्छ्यते।
स्वकलेवरं तन्मे नापि न तस्याहं कोऽर्थः सुखलवेन मे ९४ यत्रात्मा तत्र न मनो नेन्द्रियाणि न वास
नः पमराः परितिष्ठति तिक्कटेन महो भूतः ९५ स्वस्मात्पदवादस्माल्लीलया चलितस्य मे दृ
यह्नतमतेः किं च परिवारास्ययं शुभः ९६ स्वच्छतोर्जितता सत्ता हृद्यता सत्यता ज्ञता सर्वैका।
तानिर्भयता द्वीणाऽद्वित्वविकल्पता ९७ नित्योदिताः समाः स्वस्याः हृदयाः सुभगोदयाः मेमे
कात्ममतेर्नित्यं कान्ता हृदयवल्लभाः ९८ अथोद्दालको मुनिः प्रणवध्यानपूर्वकं भूतशुद्ध्या
दिकं कृत्वा समाधिविक्षेपादीनि भूयः सविकल्पसमाधिप्राप्तः इत्याह चिरानुसन्धानवशात्स्व
दनाच्च स्वसंविदः तनुश्चिन्मयतामागाद्धेमन्द्रुततामिव ९९ एवं सविकल्पसमाधिना क्रमे।

५९

णानि निरिन्धनाग्निवत्स्वच्छीयमाणो क्षीरोदकवच्छिदैकरसं जगामेत्याह चित्तत्वमर्थं संत्यज्य चित्तं चि
त्त्वतां गतम् अन्यदेव वभूवाशु पङ्कः कुम्भस्थितो यथा ३ चित्तस्य चित्तभावापगमे तत्प्रति बि
म्बचैतन्यस्य बिम्बचित्सामान्यैक्यं वृत्तमित्याह चेत्यं संत्यज्य चिच्छुद्धा चित्सामान्यमथाययौ त्यक्त
वीच्यादिभेदोऽब्धिर्वा सामान्यमिवैव धीः १ चेत्यस्यावभासवृत्त्याकारं संत्यज्य प्रतिबिंबचिच्छुद्धा
सती सर्ववृत्तिसाधारणात्साक्षिचित्सामान्यभावमुपाययौ यतः सा यका धीः एकरसीभूता स्वो
पाधिबुद्धिर्यस्याः तथाविधेत्यर्थः १ एवं निर्विकल्पसमाधिं प्रतितिष्ठितस्योद्दालकस्य तत्परिपा
कात्तत्त्वसाक्षात्कारं तत्फलं ब्रह्मवेद ब्रह्मैव भवतीति श्रुतिदर्शितं ब्रह्मभावं च दर्शयति त्यक्त
भूतौघमननं ततो विस्मृभरे महत् चिदाकाशं ततः शुद्धं सो भवद्धीयमागतः २ तद्भावमेव नि
रतिशयानन्दावाप्तिरिति दर्शयति तत्र प्राप दपानन्दं दृष्टपदर्शनवर्जितम् अनन्तमन्तमास्वा
दं रसायनमिवार्णवम् ३ सिद्धिसार्थमनादृत्य तस्मिन्नानन्दमंदिरे आतिष्ठद्धषणामासा
न्दि[illegible]टैकश्वोत्तरे ४ आनन्दपरिणाममित्याद नानन्दपदं गतः नानन्दं न निरानन्दं ततः सत्संवि
दाव भो ५ क्षणो वर्षसहस्रं वा तत्र लब्धस्थितिं मनः इति मतिं न भोगौघैर्दृष्टस्वर्गश्वाव नोद्
उद्दालकस्तदारभ्य व्यवहारपरोऽपि सन् तूस्त्समाहित एवासौ चित्तत्वैकत्वमागतः ७ चित्तत्वै
कमयाभ्यासान्महाचित्तमुपेयुषः वभूव सर्वत्र समः तेजसां रविवानतो ८ अन्तःकर
णानि हृत्यन्न गतं तत्साक्षिचिन्मात्रस्य विविच्य दर्शनं यावात्लक्षणात्समाधिं दृढाभ्यासान्

अनेनतस्यक्रमायंचा मभ्रमैः षष्ठभूमिकाप्राप्तिकक्ता ८ चित्सामान्यचिराभ्यासात्सत्तासामान्यमे
त्यसौ दृश्येऽस्मिन्स्थिरविवर्त्तालमायान्तवेदयम् ९ कदासंक्षीयतेचित्तमभावात्यन्तभावना

उप॰प्र॰ ५०

त् चित्सामान्यस्वरूपस्यसत्तासामान्यमातदा १० नर्नेचेत्यांशरहितांविज्ञानात्मनिविलीयतेऽस
द्रूपवदत्यच्छासत्तासामान्यतातदा ११ षष्ठभूमिकायांचिदवान्तरभेदानेपरिस्फुरत्यचित्सामान्य
स्वरूपभूतस्यचेत्याभावस्यात्यन्तभावनासत्यसंस्काराणामात्यन्तिकोच्छेदेसतियदाचित्तंसंक्षी
यतेतदास्वमात्रसत्तयास्वतःसिद्धातीपरिशिष्टचिदचिदुभयानुगतसन्मात्रैवसत्तासामान्यमि
त्यर्थः १० सर्वहन्निप्रतिबिंबितांचित्सर्वदृश्यवायेचेत्यांशेहन्नितद्विषयेरहितासतीयदास्वात्म
निविम्बचैतन्येलीयतेतदातस्यविम्बस्यअसद्रूपंयस्मिंस्तदसद्रूपमाकाशंतद्वदत्यच्छासत्ता
सामान्यताबोध्येत्यर्थः अस्मात्प्रभृतयः सर्वेनारदाद्याःसुराश्चैव ब्रह्मविष्णवीश्वराद्यास्तुदृष्टा
वस्थाव्यवस्थिताः १२ एतामालम्ब्यपदवीमसत्तभयनाशिनीम् उद्दालकोसावत्रसंघावा
दिकेजगद्धृहे १३ वैराग्याभ्यासशास्त्रार्थप्रज्ञागुरुयमक्रमैः पदमासाद्यतेपुण्यंप्रज्ञये
वैकयाथवा १४ संप्रबोधवतीतीक्ष्णाकलंकरहितामतिः सर्वसामग्रहीनापिपदंप्राप्नोति
शाश्वतम् १५ द्वाविमौरामसंपन्नावन्तरशेषपरिशीतलौ अन्तःशीतलतायास्याभदनंतमयं
फलम् १६ समाधिस्थानकस्यास्यचेतस्येहृतिचचले तत्रस्यतत्समाधानेसममन्मत्तताउ
वेः १७ उन्मत्ततामउवस्थस्यचेतस्यन्तीणवासनम् तदस्यान्मनदृष्टेनतत्समवुद्ध समाधिना।

50

भवत्यखिलजंतूनां यदन्तस्तद्बहिःस्थितम् अन्तस्त्थोपतप्तानां दावदाहमिदं जगत् १९ द्यौःक्ष्मा
वायुराकाशं पर्वताः सरितो दिशः अन्तःकरणतत्त्वस्य भागा बहिरवस्थिताः २० माण्डव्यप्रसादा
प्राप्तज्ञानेन स्वर्गीजटेशं किरातराज्ञानेन सुरघुसखायमात्मप्रसादप्राप्तबोधः पर्णादहितीयना
मा परिघश्चिरकालात्संयुज्योवाच यद्यत्संसारजालेस्मिन्क्रियते कर्म भूमिप तत्समाहितचित्ता
नस्सुखायान्यस्य नान ह्व २१ कच्चित्संकल्परहितं परं विश्रमणास्पदम् परमोपशमं श्रेयः
समाधिमनुतिष्ठसि २२ सुरघुरुवाच एतन्मे ब्रूहि भगवन्सर्वसंकल्पवर्जितम् परमोपश
मः श्रेयः समाधिर्हि किमुच्यते २३ समाधिमनुतिष्ठसीत्येवास्य समाधेर्यस्याविश्रमहेतोर्मनसो
बाधितत्वादिवासंभवमन्यमानस्याक्षिपति एतदिति सर्वसंकल्पवर्जितं परमोपशयं श्रेयश्चेत्यत
न्नेमहं युक्तत्वाद्ब्रूहि समाधिर्नष्ट्यइति किमर्थं त्वयोच्यत इत्यर्थः २२ योज्ञो महात्मन्सततं ति
ष्ठन्व्यवहरंस्तथा असमाहितचित्तात्मा सोकदा भवति कः किल नित्यप्रबुद्धचित्तास्तु कुर्वन्तोपि
जगत्क्रियाम् आत्मैकतत्त्वसंनिष्ठाः सदैव सुसमाधयः २५ बद्धपद्मासनस्यापि कृतब्रह्माञ्ज
लेरपि अविश्रान्तस्वभावस्य कः समाधिः कथं च वा २६ तत्त्वावबोधो भगवान्सर्वाशातृणपाव
कः प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः २७ समाहिता नित्यतृप्ता यथाभूतार्थदर्शिनी
साधो समाधिशब्देन परा प्रज्ञोच्यते बुधैः २८ यतः प्रभृति बोधेन युक्तमात्यंतिकं मनः तदारभ्य
समाधानमव्युच्छिन्नं महात्मनः २९ नहि प्रबुद्धमनसो भूत्वा विच्छिद्यते पुनः समाधिर्हरमाकु

यो· उप· ५१

ष्टोविसतन्तुःशिशोरिव ३० समग्रंदिनमालोकाद्दिरमत्यन्तयोयथा आजीवितान्तंनोप्रज्ञातथात्त्वाव
लोकनात् ३१ पद्मजउ· राजन्नूनंप्रबुद्धोसिप्राप्तवानसितत्पदम् संशीतलान्तःकरणःपूर्णेन्दुरि
वराजसे ३२ वसिष्ठउ· दिनानिजीव्यन्तेतानिसानन्दान्यत्रकियाक्रयाः आत्मचंद्रोदितायेषुचिज्ज्यो
त्स्नाहृदयाम्बरे ३३ चिरंशोचन्तितेदीनाजन्मजंगलवीरुधः आत्मावलोकनेहेलायेषामविगते
नसाम्य ३४ महानुभावसंपर्कात्संसारार्णवलंघने युक्तिःसंप्राप्यतेरामस्फुटानौरिवनाविकात्
यस्मिन्देशेमनीषीतज्ज्ञोनास्तिसज्जनपादपः सफलःशीतलच्छायोनतत्रनिवसेद्बुधः ३६ नय
नानिनमित्राणिनशास्त्राणिनबांधवाः नराणामुपकुर्वन्तिमग्नस्यात्मसमुद्धृतौ ३७ मनोमात्रे
णास्तहृदासेदेवसहवासिना सख्यंकिंचित्परामृश्यभवत्यात्मासमुद्धृतः ३८ एतावतैवदेशः
परमात्मावगम्यते काष्ठलोष्टसमत्वेनदेहोयदवगम्यते ३९ सखायंचिरतपस्विनंभासंवि
रतापसोविलासस्थिरतोमिलित्वावाच जीविताग्रद्रुमफलहृदावासामृताम्बुधे जगत्यस्मि
न्महावैयोभासस्वागतमस्तुते ४० कच्चित्तेविज्वराबुद्धिःकच्चिज्ज्ञातस्त्वमात्मवान् कच्चि
त्फलितविद्यस्त्वंकच्चित्कुशलवानसि ४१ भासउवाच साधोस्वागततद्येवदिष्ट्याहृष्टोसि ।
मानद कुशलंनुकुतोस्माकंसंसारेनिष्ठतामिह ४२ यावन्नाधिगतंज्ञेयंयावत्क्षीणानुचि
त्तभूः यावत्तीर्णोनसंसारस्तावन्नोकुशलंकुतः ४३ आशायावदशेषेणनलूनाश्छिन्नसंभ
वाः वीरुधोदात्रकेणेवतावन्नःकुशलंकुतः ४४ यावन्नाधिगतंज्ञानंयावन्नसमतोदिता।

यावन्नाभ्युदितोबोधस्तावन्नःकुशलंकुतः ४५ एवंतौकुशलप्रश्नंकृतवंतौपरस्परं कालेनासा
द्यविमलंज्ञानेमेदंततोगतौ ४६ समाधिर्हिद्विधाप्रोक्तावन्ध्यावन्ध्याचराघव वन्ध्यासर्वत्रमू
ढानांवन्ध्यातत्वविदांमता ४७ अन्तःसंसक्तमङ्गानामङ्गारंविद्धिराघव अनन्तःसङ्गानांविद्धि
रामरसायनम् ४८ सर्वदासर्वसंस्थितसर्वेषामसहृतिष्टता सर्वकर्मरतेनापिमनःकार्यविज्ञा
नता ४९ नसत्कर्मिरूचेष्टास्तनविन्नास्तनवस्तुषु नाप्काशेनाप्ययोभागेनाग्रेदिक्कलनासु
च ५० नवहिर्विपुलाभोगेनचैवेन्द्रियवृत्तिषु नाभ्यन्तरेनचप्राणेनमूर्ध्निनतालुनि ५१ नभ्रू
मध्येनवानासान्तेनवक्त्रेनचतारके नान्धकारेनचाभासेनचास्मिन्हृदयाम्बरे ५२ नजाग्रति
नचस्वप्नेनसुषुप्तेनतिर्मले नासितेनचवापीतेरक्तादौशवलेनच ५३ नचलेनस्थिरेनादौ
नमध्येनेतरत्रच नदूरेनान्तिकेनाग्रेनपदार्थेनचात्मनि ५४ नशब्दस्पर्शरूपेषुनमोहानन्द
वृत्तिषु नगमागमचेष्टास्तनकालकलनासुच ५५ केवलंचितिविश्रम्यकिंचिच्चेत्यावल
म्बिनि सर्वत्रनीरसमिवतिष्ठत्यात्मरमनः ५६ सत्यासत्यंजगद्रूपमन्तःकरणविम्बिता आ
त्मसंवित्तनोतीदमालोकमिवसूर्यभाः ५७ अन्तःकरणमेवातःकारणंभूतसंसृतौ आत्मा
सर्वान्नगतत्वान्नकारणंसदकारणम् ५८ द्वादशादिवसः गोष्पदंपृथ्वीमेरुःस्थाणुराशा
समुद्गिकाः तृणंत्रिभुवनंराम नैराश्यालंकृतात्मनः ५९ दानादानसमाहारविहारविभवा
दिकाः त्रियाजगन्तिहस्यन्तेनिराशाःपुरुषोत्तमैः ६० रक्तवालाङ्गनस्यापिज्ञस्योदारतयामनेः

कटाक्षाः यां प्रुतां यान्ति मनसः स्मरसायकाः ६१ शरीराद्व्यतिरिक्तेऽज्ञपशुतः अविवेकिनः विकर्त्ति
तां गकस्यापि न किंचिद्य विकर्त्तिते ६२ परब्रह्मणि नीरीव्यग्रापि गृहकर्मणि तदेवास्वादयत्यंतः
परसंगरसायनम् ६३ एवं तत्त्वे परे शुद्धे धीरो विश्रान्तिमागतः न शक्यते चालयितुं देवैरपि स
वासवैः ६४ संस्थिता व्यवहारेषु विचित्राचारयापि तु अन्तराः शीतलाः केचित्केचिन्मूढाः
शिलासमाः ६५ विचार्याप्ततत्त्वमालोक्य सेव्यते या विभूतयः ताउदर्कोदयाजंतोः शोषाडुःखा
यकेवलम् ६६ विचार्यार्थैः सदालोक्य धिया संसारसागरः एतस्मिंस्तदनुक्रीडां शोभते
गमनान्यथा ६७ पूर्वं धिया विचार्यैते भोगा भोगिभयप्रदाः भोक्तव्याश्चरमं राम गारुडैर्न
वपन्नगाः ६८ अपि शीतरुचावर्के सुतीक्ष्णेऽपीन्दुमण्डले अप्यधः प्रसरत्यग्नौ जीवन्मुक्तो न
विस्मयी ६९ चिदात्मन इमा इत्थं प्रस्फुरन्तीह शक्तयः इत्यस्याश्चर्यजालेषु नाभ्युदेति कुतू
हलम् ७० श्रीरामः अनिशं चरतो देहगेहे गगनगामिनाम् प्राणादीनां परिस्पन्दो वायूनां
रोध्यते कथम् ७१ वसिष्ठः शास्त्रसज्जनसंपर्कवैराग्याभ्यासयोगतः अनास्थायां कृतास्था
स्थायां पूर्वं संसारवृत्तिषु ७२ यथाभिवाञ्छितध्यानाच्चिरमेकतयोदितात् एकतत्त्वघना
भ्यासात्प्राणस्पन्दो निरुध्यते ७३ पूरककुम्भकरेचकक्रमेण प्राणनिरोधसहिताद्राजयोगा
द्वाडदीन्तचित्तस्पन्दनिरोधः कार्य इत्याह पूरकादिनिजायामाद्दृढाभ्यासादखेदजात् ए
कान्तध्यानसंयोगात्प्राणस्पन्दो निरुध्यते ७४ दीर्घोच्चारितप्रणवान्तर्यमात्रालंबनयोगा

ह्रासकार्यमित्याह ॐकारोच्चारणप्रान्तशून्यत्वानुभावनात् सुषुप्ते संविदो ज्ञाते प्राणा ७५ इदा-
नीं रेचकपूरकयोरेकैकस्यापि श्वासप्रश्वासशिथिलीकरणकालेऽदे ऊर्ध्वाभिवर्द्धनसहितध्याना-
भ्यासादपि तन्निरोध इत्याह द्वाभ्यां रेचकेनैन मभ्यस्ते प्राणेऽस्फोरखमागते नसूक्ष्मशून्यकुञ्चन्याणि
प्राणा ७६ कुम्भके कुम्भवत्कालमनेते परितिष्ठति अभ्यासात्तन्निभते प्राणे प्राणाः ७७ तालुमू-
लगतां यत्नाज्जिह्वयाक्रम्य घण्टिकाम् ऊर्ध्वरन्ध्रगते प्राणे प्राणाः ७८ जिह्वामूले स्खलनवलम्ब-
मानतया दृश्यमानामिन्द्रयोनिं अन्तर्वेणा तालुके यण्षस्तन इवावलम्बते सेन्द्रयोनिरिति स्मृतः
तां परिहृत्य यावर्द्धनाभ्यासादि प्रयत्नादन्तः प्राणसंचारमार्गमर्द्धरन्ध्रे प्रवेश्यमानया जिह्वयाक्र-
म्य निष्पीड्याथः कृत्य प्राणोऽर्ध्वरन्ध्रे ब्रह्मरन्ध्रे गते प्रवेश्यपारिते मसनीत्यर्थः। अनेन लंबिकायो-
गसमन्वितानभोधारणादर्शिता तत्प्रकारश्च भगवता स्वच्छन्दे नोक्तः रसनां तालुविवरे निया-
योर्ध्वमुखे वाक्रते ययन्निर्जरतां गच्छेदावरामासान्नसंशयः ऊर्ध्वजिह्वः स्थिरो भूत्वा सोमपानं
करोति यः मासार्द्धेन न संदेहो मृत्युं जयति योगवित् आकाशे चमरीश्चिवा दिसदृशे यद्ब्रह्मरन्ध्र-
स्थिते यन्नाथेन सदाशिवेन सहितं शान्ते हूकाराद्वारे प्राणे तन्न विलीय पंचघटिके चिन्नान्वितया
धारयेदेषा मोहकवाटपाटनपटुः प्रोक्तानभोधारणेति समस्तकलनोन्मूकेन किंचिन्नामस-
ह्नरव ध्यानात्संविदि लीनायां प्राणाः ७९ नासाग्रोपलक्षित द्वादशाङ्गुलपरिमितबाह्याकाशे
चक्षुर्मनसा निरोधाद्ध्यानान्निरोध इत्याह द्वादशाङ्गुलपर्यन्ते नासाग्रे विमलाम्बरे संविद्दृशोः

प्रशाम्यन्तोः प्राणाः ८० लौकिकायोगाः समुच्छिन्ताद्वेषयान्तराम्यस्थानाग्रागुरूक्त नभोधारणात्तत्सिद्धिरि
त्याह अभ्यासाद्धूर्ध्वरन्ध्रेण तालूर्ध्वद्वादशान्तगे प्राणे गलितसंवित्ते प्राणाः ८१ एवं खेचरीमुद्रयापि प्रा
णास्पन्दनिरोधहेतुरित्याह भ्रूमध्ये तारकालोकशान्तावन्तमुपागते चेतने केतने बुद्धेः प्राणाः ८२
केतने भ्रूमध्ये अविमुक्तस्थाने एषो वरणो नन्त इति जाबालश्रुत्यादिप्रसिद्धे चेतने चिन्मात्रभावे पर
मेश्वरे आत्मतया बुद्धे सतीत्यर्थः खेचरीमुद्रापि स्कंदेनोक्ता कपालकुहरे जिह्वा प्रविष्टा विपरी
तगा भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी न पीड्यते स रोगेण न च लिप्येत कर्मणा बाध्यते
न स कालेन यो मुद्रां वेत्ति खेचरीमिति ८२ गुरोरीश्वरस्यवानुग्रहात्काकतालीयन्यायेन झटि
त्येवाह ते ज्ञाने झटित्येव चित्तविकल्पोपशमाद्धातन्निरोध इत्याह झटित्येव यदृच्छ ते ज्ञाने तस्मिन्
दृढाभ्रिते असंस्पृष्टविकल्पांशे प्राणाः ८३ अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वे
श्म दहरोऽस्मिन्नन्तराकाश इत्यादिश्रुतिप्रसिद्धे हृद्दहराकाशे वा चिरं चित्तनिवेशात्तत्साक्षा
त्कारेण तत्सिद्धिरित्याह चिरकालं हृदेकान्तव्योमसंवेदनान्मुनेः अवासनात्मयोध्यानात्प्रा
णास्पन्दो निरुध्यते ८४ एभिः क्रमैस्तथान्यैश्च नानासंकल्पकल्पितैः नानादेशिकवक्त्रस्थैः
प्राणास्पंदो निरुध्यते ८५ अभ्यासेन दृढं नीतानेतास्ता योगयुक्तयः उपायतामुपायांति
भवस्य भवभेदने ८६ अभ्यासाद्दृढतां यातो वैराग्यपरिलाञ्छितः यथावासनमायामः
प्राणानां सफलः स्मृतः ८७ अत एव तत्सिद्धिफलभेदार्थं पातञ्जलशास्त्रे भ्रूमध्यादिस्था

उप॰प्र॰

५३

५३

नभेदेन धारणाभेदा दर्शिता इत्याशयेनाह भ्रूवासा तालसंस्थाह द्वादशांगुलिकोटिषु अभ्यासा
त्क्रामयति प्राणो हृद्येगिरिनदी यथा ८८ तालसंस्थाने कंठाग्रादारभ्य द्वादशांगुलिमितप्रदे
शः कोटिः सीमा द्वादशान्तः यथाह पतञ्जलिः नाभिचक्रे कायव्यूहज्ञानम् कण्ठकूपे क्षु
त्पिपासानिवृत्तिः कूर्मनाड्यां स्थैर्यम् कण्ठकूपादधः कूर्म एव वृत्तप्रदेशः कूर्मनाडी प्रसि
द्धा मूर्धज्योतिषि सिद्धदर्शनमित्यादि शिरः कपालच्छिद्रे भास्वरज्योतिर्मूर्ध्नि ज्योतिः अभ्यासे
न यदि स्पंदे प्राणानां द्वयमागते मनः प्रशममायाति निर्वाणमवशिष्यते ८९ कृतस्मारविचा
रस्य मनोभोगादयोरयः मनागपि न भिंदंति शैलं मंदानिला इव ९० अविचारिणामज्ञानेन मू।
ढमायायन्त्रयाणाम् निगिरंती हृद्दुःखानि बकामत्स्यमिवाजलम् ९१ संवित्तिः सह स्वल्पापि।
शाचीभिः सह कोपादिगुह्यकैः निगिरंति चित्तवेतालशरीरसदनान्मम ९२ जडे प्रेतसमाका
रे गते त्वयि मनःशठे सर्वसज्जनसंसेव्यमिदं देहगृहं मम ९३ मृतं मनो मृता चिंता मृतोऽहंका
रराक्षसः विचारमंत्रेण मम स्वस्थस्तिष्ठामि केवलम् ९४ एकस्मै कृतकृत्याय नित्याय वि
मलात्मने निर्विकल्पचिदाख्याय मह्यमेव नमो नमः ९५ न ममाशा न कर्माणि न संसारो न कर्तृ
ता नमोऽस्तु तानन्ददेहो मे मह्यमेव नमो नमः ९६ अहमादिरहं याता चिदहं भेदनाशकम् मम नास्ति
बंधच्छेदो मह्यमेव नमो नमः ९७ विरागमानमद्यामदिनां प्राप्ताः शरदुपोढ्वाशशांकसमत्विषः।
महान्तं भवमहारविहारणाह्निक सुखं विहरन्ति महाशयाः ९८ इति संवित्तिविचारः विन्ध्या।

उप॰
५८

54

केचेद्वीतहव्यमुनेर्विचारपूर्वकं वर्षशतत्रयं निर्विकल्पसमाध्यनन्तरं शरव्यशेषेणान्तर्हृद्येव जीवसंवि-
न्मनोऽप्यपि गोभुक्त्वा जीवन्मुक्ततया कैलासकदम्बनलेशतनवर्षं मुनित्वं शतवर्षं विद्याधरत्वं युगपञ्च-
कमिन्द्रत्वमाकल्पं शिवगणत्वं चानुभूय स्वदेहान्तः प्रविश्य सूर्यानुयानतः सोऽपि पिङ्गलिप्रविश्य तत्र स्वदे-
वापङ्कपीडितं स्वकलेवरं यदातो निष्क्राम्य प्रविश्य च स्नानसंध्यादि कृतवान् मैत्र्यातया समतया प-
रया च शान्त्या सर्वज्ञतया मुदितया कृपया श्रिया च युक्तो मुनिः सकलसंगविमुक्तचेता विन्ध्ये स-
रित्तटगतो दिनमेवं वेमे ५५ दिनान्ते ससमाधानं पुनरेव मनो मुनिः विवेशाकाचिद्धि ततो विन्ध्या-
तो विन्ध्यकन्दराम् ८०·· तदेवात्मानुसंधानमत्यजन्समभिन्द्रियैः चेतसा कलयामास तत्र श्लो-
कपरावरः १ एवमेवेन्द्रियगणो मयापरिहृतः स्फुटम् इदानीं चिंतयानाद्यैः पुनर्वितनयामम
भाविनात्मनीतिकलनाभेन्नाम्रद्वीलनामिव शोषं तद्बुद्धसंस्थानम्तिष्ठाम्यवलम्बकुड्यवत् ३ उदि-
तोऽस्तंगत इवस्वस्तंगत इवोदितः समः समरसाभासास्तिष्ठामि सुखमास्थितः ४ प्रबुद्धोऽपि सुषुप्त-
स्थः सुषुप्तस्थः प्रबुद्धवत् तुर्यमालम्ब्य कायान्तस्तिष्ठामि स्तम्भितस्थितिः ५ स्थितः स्थाणुरि-
वैकान्ते स्वान्तान्ते सर्वतः स्थिते सत्तासामान्यसाम्येऽस्मिंस्तिष्ठाम्यपगतामयः ६ इतिसंचिन्त्य तत्प्रा-
ने पुनरस्तस्थौ दिनानि षट् ततः प्रबोधमापन्नः क्षणात्स्वप्नवाम्बगः ७ ततः सिद्धः स भगवान्वी-
तहव्यो महातपाः विजहार चिरं कालं जीवन्मुक्ततया तदा ८ वस्तुनाभिनन्दाऽसौ नाति निन्दन
कदाचन नत्जगामतथोद्वेगं न च हर्षमवापसः ९ गच्छंस्तिष्ठन्नखिलेवतस्यैवमभवद्धृदि वि-

५८

नोदा यच्च चिन्तस्य कथास्त्व मनसा सह १० अव्ययेन्द्रियवर्गेशमनः शमवतां त्वया पद्मपानन्दसुधा।
रंकुकीदृग्विधमासादितं ततम् ११ एषैवाविरतं तस्मान्नीरागैव दशा त्वया अवलम्ब्या परित्या।
ज्यं चापलं चलतां वर १२ भो भो इन्द्रियचौरा हे हृताशा हतनामकाः युष्माकं नायमात्मास्ति
न भूवन्नास्त्यथात्मनः १३ व्रजतो वो विनाशं शमाशा वो विफलीकृताः न समर्थाः समाक्रान्तो
भवन्तो भंगुराश्रयाः १४ वयमात्मेति येषां वो वभ्रैव किल वासना न तु विस्मृति जाता हि द्व
ष्टरज्जुभुजंगवत् १५ अनात्मन्यात्मता सेषां सेषा वृत्तिस्त्वयं वस्तुता अविचारे रोव जाता विचा
रे साद्द्वयं गता १६ न भवन्तो न सैव यं चास्मि ब्रह्मात्मनः तत्परा अन्यो भोक्तान्य आदत्ते को दोषः
कस्य कीदृशः १७ एवं चेत्कथं व्यवहारकार्यनिष्पत्तिरिति चेत्काकतालीयन्यायादिति गृह
दृष्टांतेनाह वनेभ्यो दाहसंजाते रज्जवो वेराउ च मे रगाः वापीचाऽयः फलान्येव तद्वा ग्रासा
र्थमुद्यतः १८ इत्थं यथेह सामग्र्यो स्वशक्तिस्य पदार्थया संपन्ना काकतालीयात्स्व शक्ति निय
तेन्द्रियाः १९ तथैव कलिकालोल्लेके न कस्यात्र खण्डना विस्मृति विस्मृता दूरे स्मृतिः स्फुटमन
स्मृता २० सच्च सत्यमसच्चासत्तत्ते द्वीरास्थिते स्थितम् एवं विधेन भगवान्विचारेणामहात
वाः २१ सोऽतिपन्नाः निशाहं ल्लोवहूत्वर्षगणानिह अपुनर्भवनायैव यत्नचिन्तान्तमागता २२
मूर्छता च सहूरस्यात त्रासावव सत्सदा यथाभूत पदार्थो च दर्शिनोऽत्यमनर्थकम् ध्याना।
भ्यासनमालम्ब्य सोऽवसत्तत्र वनः सदा हेयादेयसमातेगत्यागादानदृशोः द्वये २४ वीतद्व

न्तेरासीदिच्छातिगमनः विदेहकेवलीभावेसीमांते जन्मकर्मणाम् २५ संसारसंगसंत्यागरसा
स्वादनवेच्छया विवेश तत्रैवान्तो मत्वाद्रौ हेमकन्दरम् अपुनःसंगमायास्तु जगज्जालमवे
क्ष्य सः २६ बद्धपद्मासनः स्थित्वा तत्रैवाचात्मनात्मनि रागनीरागतां गच्छन् द्वेषनिर्द्वेषतां व्रज
न्मरुज्योतिस्तु चिरं कामिह प्रक्रीडितं मया भोगानमोस्तु युष्मभ्यं जनकोटिशतान्यहं २८ भ
वद्भिर्लालितो लोके लालकैरिव बालकः इमामपि परां पुण्यां निर्वाणपदवीमहं २९ येन वि
स्मारितस्तस्मै समवायात्स्तु नमोनमः त्वद्प्रसेनहेदुःखमयात्मान्विष्याद्यात् ३० तस्मा
त्तेऽपदिष्टोयमार्गोमममनसोस्तुते त्वत्प्रसादेन लब्धेयं शीतला पदवीमिया ३१ दुःखनाम्ने
हदुःखतत्वस्तुखदात्मन्नमोस्तुते कल्याणमस्तुते मित्र संसारासारजीवित ३२ देहस्थिति
रियं यामोवयमात्मीयमास्पदम् प्रयोजनानानां जेतन् नामहोन्नविषमागतिः ३३ देहेना
पिवियुज्येपसे भूत्वा जन्मशतान्यपि मित्रकायमयायत्वंत्पज्यसेचिरबान्धवः ३४ त्वयैवात्म
न्युपानीतास्त्वात्मज्ञानवशान्द्गतिः अथिगम्यात्मविज्ञानमात्मनाशः कृतस्त्वया ३५ देहा
नान्येन भग्नोस्मि त्वयैवेतदुपास्तितम् एकाकिन्यापि शुध्यत्याप्रशान्तमयिदीनया ३६ त्वया
दुःखेन कर्त्तव्यं मात स्त्वेस्तेव्रजाम्यहम् हान्तव्याः कामभगवान्विपरीतापराधजाः ३७ दो
षाउपशमैकान्त व्रजाम्यादिशमङ्गलम् चिराच्चिराय वेदानीमन्वत्स्यकिलावयोः ३८
वियोगोगदोषणा प्रणामोयंसपाश्चिमः नमःसुकृतदेवाय भवतेस्तुतयापुरा ३९ नर

केभ्यः समन्तात्स्वर्गे ह्रमभियोजितः कुकार्येर्ह्येव ह्रत्थायनरकसंक्षयवाहिने ४१ शासनात्तु
ष्यभावाय नमोऽस्तु कृतशासिने येन मामिह चिरं विबोधकाः प्राकृता यो न यः स्वयंप्रभुत्वतृष्णा
यतस्मै मोहात्मने नमः प्रध्वनं दृशमयुरवचसे पत्रदाससे नमो गुह्यान्तपलिन्यैव यस्यायैस
मायिषु ४२ संसाराख्यनिगिवन्नसत्वसमाश्वासकारणाम् आसीर्वयस्या स्वस्तिन्या सर्वलो
भापहारिणी सर्वसंकटगिवन्नेन दोषेभ्योद्भवता मया त्वमेकाशोकनाशार्थमाश्रिता पर
मा सखी ४४ संकटावटकुंजेषु हस्तालंबनदायिने वाई केकान्तमहृदे देडकाष्टायते न
मः ४५ अस्थिपञ्जरमात्मीयेतथारक्तोव्रतन्तुकं एतावन्मात्रसारिकं गृहीत्वागच्छदेहकं ४६
पयः स्तोभप्रकाशेभ्यः स्त्वनिभ्योपि नमोऽस्तु ते नमोऽस्तु व्यवहारेभ्यः संस्तुतिभ्यो नमोऽस्तु ते ४७
एते भवन्तः सहजाः प्रान्तानाः सुहृदो मया क्रमेणाग्रे यान्तृताः प्राणाः स्वस्ति वोऽस्तु व्रजाम्यहं
भवद्भिः सह विश्वासमया वक्षीषु योनिषु विश्रान्तं गिरिकुञ्जेषु भ्रान्तं लोकान्तरेषु च ४९
क्रीडितं पुरपीठान्तरुषितेपर्वतेषु च स्थितं कार्यविलासेषु प्रस्थितं विविधाध्वसु ५० नता
द्भिस्तु जगत्कोशे भवद्भिः सह यन्मया न कृतं न सहं तेयातं न दत्तं नावलेवितं ५१ इदानीं स्वां
दिशं यान्तु भवन्तो याम्यहं प्रियाः सर्वेषु यान्त्वानि चयाः पतनान्ताः समुच्छ्रयाः ५२ संयोगा
विप्रयोगान्ताः सर्वे संसारवर्त्मनि अयं चाद्य कषश्यालोको विशत्वादित्यमंडलम् ५३ विश
त्ववनपुष्पाणि सोगन्ध्यानन्दसंविदः प्राणानिलस्तथा स्पन्दं विशत्वयं प्रभंजनम् ५४

विश्रान्ताकाशकुहरं शान्तस्पन्दवशाक्रियः इन्दुमण्डलमायातरसनारमशक्रियः ५५ निर्मन्दर इवा
म्भोधिर्गतार्क इव वासरः शारदीव घनः स्वैरं प्राप्तः कल्पान्तसर्गवत् ५६ ओंकारान्ते स्वमननं प्रशा
म्यात्मानमात्मनि दग्धेन्धन इवार्चिष्मान्निःस्नेह इव दीपकः ५७ व्यपगताखिलकार्यपरंपरः स
कलदृश्यपदशाविगतस्थितिः प्रणवशान्त्यनुसंस्मृतिशान्तधीर्विगतमोहमलीयमहंस्थितः ५८
वसिष्ठः एवं कलितवानन्तः प्रशान्तमननैषणः शनैरुच्चारयंस्तारं प्रणवं प्राप्तभूमिकः ५९
मात्रादिपादभेदेन प्रणवं संस्मरन्यतिः अध्यारोपापवादेन स्वरूपं शुद्धमव्ययम् ६० सबाह्या
भ्यन्तरान्भावान्स्थूलान्सूक्ष्मतरानपि त्रैलोक्यसंभवांस्त्यक्त्वा संकल्पाकल्पकल्पितान् ६१
तिष्ठन्नन्तर्भिन्नाकारश्चिन्तामणिरिवात्मनि संस्पर्शी इव शीतांशुर्विश्रान्त इव मन्दरः ६२ कुम्भा
कारगृहे चक्रे संरोधितमिव भ्रमात् अम्भोधिरिव संस्पर्शी स्तिमितस्फारनिर्मलः ६३ शान्त
तेजस्तमःपुंजो विगतार्केन्दुतारके अधूमाभ्ररजः स्वच्छमनेनं शरदीव खम् ६४ तदप्रणा
वपर्यन्तदीर्घनिस्वननं तनुता जहाविद्धि यतन्मात्रजालं गन्धमिवानलः ६५ यतिः संन्यासी
वीतहव्यः ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव य
च्चान्यत्त्रिकालातीतं तदप्योंकार एवेति माण्डूक्यश्रुतिदर्शितक्रमेण अकारोकारमकाराख्य मा
त्राभिरर्धमात्राच कल्पितेन स्थूलसूक्ष्माव्याकृततुरीयलक्षणपादभेदेन प्रणवं संस्मरन्सा
न्तःपंचीकरणोक्तेन विराड्हिरण्यगर्भाव्याकृतलक्षणानां तत्र्ये प्रथमं जागरितस्थानो बहिः

प्रज्ञ इत्यादिश्रुत्युक्तदिशाध्यारोपणानान्तःप्रज्ञो नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमित्या
द्यपवादेन च स्थूलसूक्ष्मकारणात्मनोपि सबाह्याभ्यन्तरान्मावोह्यात्मा शुद्धमव्ययं स्वरूपं दृष्ट्वा
प्रपंचोपशमं शिवं शान्तमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेय इति श्रुत्युक्ते तुर्ये तत्रात्मनि ति।
ष्ठन्सन्सर्वगाबाग्रभावाल्लक्षरोनदीर्घनिस्वनं तेन तन्नामेहेन्द्रियतन्मात्रजाले जह्वाविति षष्ठेन सवे
य- ५९ ६० ६१ ६२ ६३ ६४ ६५ ततो जहौ तमोमात्रं प्रतिभातमिवाम्बरे उन्मिषन्न्यस्तु रवद्भूपे प्रा।
ज्ञः कोपलवं यथा प्रतिभात तन्न लेज्ञो निमेषार्द्धं विचार्यसः जहौ वृभव च तदा नन्तमोऽय प्रका
शकम् ६६ ६७ तामवस्थामथासाद्य मननसात्मनस्तथा मनागपि प्रस्फुरितं निमेषार्द्धादशा
नयत् ६८ ततोऽङ्गः संविदं स्वस्यां प्रतिभासमुपागताम् सद्योजातशिशुज्ञानसमानकलनाम
लम् ६९ निमेषार्द्धार्द्धभागेन कालेन कलनाप्रभुः जहौ चित्तश्चित्पदं शान्तः सन्दशक्तिमिवानिलः
७० पश्यन्तीपदमासाद्य मन्त्रामात्रात्मके ततः सुषुप्तपदमालव्यतस्थो गिरिरिवाचलः ७१ ततः।
सुषुप्ते संस्थाने स्थित्वा स्थित्वा विभुर्मनाक् सुषुप्ते स्थैर्यमासाद्य तुर्यरूपमुपाययौ ७२ निरानन्दो
पि सानन्दः सच्चासच्चापि तत्र सः आसीन्न किंचित् किंचिन्न तत्प्रकाशस्तिमिरं यथा ७३ अचिन्मयं
चिन्मयं च नेति नेतिर्यदुच्यते ततस्तत्सवभूवासौ यन्निरामयगोचरः ७४ तदसौ सत्समं स्फारं
पदं परमपावनम् सर्वभावान्तरगतमभूत्सर्वविवर्जितम् ७५ यच्छून्यवादिनां शून्यं ब्रह्म ब्र
ह्मविदां वरं विज्ञानमात्रं विज्ञानविदां यदमलं पदं ७६ पुरुषः सांख्यदृष्टीनामीश्वरो योगवादि

उप॰प्र॰
५०

57

नाम् शिवः शिवमतस्थानां कालः कालिकवादिनाम् ७७ आत्मात्मनस्तद्विदुषां नैरात्म्यं तादृशात्मना
म् मध्यं माध्यमिकानां च सर्वं समसमचेतसाम् ७८ यत्सर्वशास्त्रसिद्धान्तो यत्सर्वहृदयानुगम् य
त्सर्वं सर्वगं सार्वं यत्तत्तत्सदसौ स्थितः ७९ यदन्तर्मनिस्पन्दं दीप्यते तेजसामपि स्वानुभूत्येक
मात्रं यद्यत्तत्तत्सदसौ स्थितः ८० यदेकं चाप्यनेकं च अञ्जनारञ्जनं रञ्जनम् यत्सर्वं चाप्यसर्वं च यत्त
त्तत्सदसौ स्थितः ८१ अजमजरमनाद्यनेकमेकं पदममलं सकलं च निःकलं च स्थित इति सत
दानभः स्वरूपादपि विमलः स्थितिरीश्वरः सर्वगोन ८२ यदेतदखिलं राम भवते वर्णितं मया
यद्देवर्षीयामप्यवर्णयिष्यामि यत्त्ववा ८३ त्रिकालदर्शिना नित्यं चिरं च किल जीवता वि
चारितं च दृष्टं च मया तदखिलं स्वयं ८४ तदेताममलां दृष्टिमवलम्ब्य महामते ज्ञानमासाद
य परं ज्ञानान्मुक्तिर्हि लभ्यते ८५ ज्ञानान्निर्दुःखतामेति ज्ञानादज्ञानसंक्षयः ज्ञानादेव परा
सिद्धिर्नान्यस्माद्राम वस्तुनः ८६ ज्ञानेन सकलामासां विनिकृत्य समन्ततः शान्तताशेषचिन्ना
द्विवीतहव्योऽमुनीश्वरः ८७ रामः जीवन्मुक्तशरीराणां कथमात्मविदां वर शक्तयो नेह दृश्य
न्ते आकाशगमनादिकाः ८८ वसिष्ठः यत्किंचित्त्रिक्रियाजालं दृश्यते गम्यते पुनः राम वस्तु
स्वभावोऽसौ न तदात्मविदां मतम् ८९ अनात्मविदमुक्तोऽपि नभोविहरणादिकम् द्रव्यकर्म
क्रियाकालशक्त्या प्राप्नोति राघव ९० नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्मवान्स्वयं आत्मा
नात्मनि संतृप्तो नाविद्यामनुधावति ९१ ये केचन जगद्भावास्ताननविद्यामयान्विदुः कथं ते

५०

पुंकिलात्मज्ञस्त्यक्ताविद्योनिमज्जति ९२ द्रव्यदेशक्रियाकालयुक्तयः साधुसंविदः परमात्मपा-
दप्राप्तौ नोपकुर्वन्ति काश्चन ९३ रामः ब्रह्मरापस्तंगते चित्ते कस्य मेत्र्यादयो गुणाः क्व वा परिस्फु-
रन्तीति वदमेवं वदतां वर ९४ वसिष्ठः द्विविधश्चित्तनाशोस्ति सरूपोरूप एव च जीवन्मुक्तः सरू-
पः स्यादरूपो देहमुक्तिजः ९५ सुखदुःखदशाधीरं साम्यान्न प्रोद्धरन्ति यम् निःश्वासा इव शै-
लेन्द्रं चित्तं तस्य मृतं विदुः ९६ अयं सोहमयं नाहमिति चिन्तान रोत्तमम् स्वीकरोति यन्ना-
तर्नष्टं तस्य मनो विदुः ९७ आपत्कार्पण्यमुत्साहो मदो मान्द्यं महोत्सवः येन यन्ति न वैरूप्यं तस्य
नष्टं मनो विदुः ९८ जीवन्मुक्तमनोनाशे सत्वनाम्नि हिमालये वसन्त इव मञ्जर्यः स्फुरन्ति
गुणसम्पदः ९९ ब्रह्मसत्तस्मृतिस्फूर्जीकालतायावितताकृतेः प्रवृद्धमूलमालाया मोहसेक
जलाञ्जलेः ५०० किं बीजमथ बीजस्य तस्य किं बीजमुच्यते अथ तस्यापि किं बीजं तस्यापि
किं भवेत् १ वसिष्ठः अन्तर्लीनमहारम्भशुभाशुभमहाङ्कुरम् संसृतिव्रततेर्बीजं शरीरं विद्धि
राघव २ भावाभावदशाकोशदुःखरत्नसमुद्गकम् बीजमस्य शरीरस्य चित्तमाशावशानुगम्
द्वे बीजे चित्तवृक्षस्य वृत्तिव्रततिधारिणः एकं प्राणपरिस्पन्दो द्वितीयं दृढभावना ४ यदा नस्पन्द-
ते प्राणः शिरासरणिकोटरे असंवित्तिवशात्तेन चित्तमन्तर्न जायते ५ दृढभावनयात्यक्तपू-
र्वापरविचारणम् यदादानं पदार्थस्य वासना सा प्रकीर्तिता ६ भावितस्तीव्रसंवेगादात्मना
यत्तदेव सः भवत्याशु महाबाहो विगतेतरसंस्मृतिः ७ द्वे बीजे राम चित्तस्य प्राणस्पन्दनवा-

स्तेने एकस्मिंस्तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः ८ वासनावशतः प्राणस्पन्दस्तेन च वासना जाय
ते चित्तवृक्षस्य तेन बीजाङ्कुरक्रमः ९ हृदि संवेद्यमाद्येव प्राणस्पन्दोथवासना उदेति तस्मात्संवे
द्यं कथितं बीजमेतयोः १० संवेद्यसंपरित्यागात्प्राणस्पन्दनवासने समूलं नश्यतः क्षिप्रं मूल
च्छेदादिव द्रुमः ११ संविदं विद्धि संवेद्यबीजं धीरतया विना न संभवति संवेद्यं तैलहीनस्तिलो
यथा १२ संविद्दृश्यदशालम्बः स यस्येह न विद्यते सोसंविदजडः प्रोक्तः कुर्वन्कार्यशतान्यपि
संवेद्येन हृदाकाशे मनागपि न लिप्यते यस्यासावजडा संविज्जीवन्मुक्तः स कथ्यते १४ अथवा
स्याः संविदो नाम सन्मात्रं बीजमुच्यते संविन्मात्रादुदेत्येषा प्राकाश्यमिव तेजसः १५ रामः एता
न्येतानि प्रोक्तानि त्वया बीजानि मानद कतमस्य प्रयोगेणाशीघ्रं तत्प्राप्यते पदम् १६ वसिष्ठः
सत्तासामान्यकोटिस्थे द्रागित्येव पदे यदि पौरुषेण प्रयत्नेन बलात्संत्यज्य वासनाम् १७ स्थि
तिं बध्नासि तत्त्वज्ञ क्षणमप्यक्षयात्मिकाम् क्षणेनास्मिन्नेव तत्साधु पदमासादयस्यलम् १८
सत्तासामान्यरूपे वा करोषि स्थितिमङ्ग चेत् तत्किंचिदधिकेनेह यत्नेनाप्नोषि तत्पदम् १९
संवित्तत्त्वे कृतध्यानो यदि तिष्ठसि चानघ तद्यत्नेनाधिकेनोच्चैरासादयसि तत्पदम् २० वास
नासंपरित्यागे यदि यत्नं करोषि च तत्ते शिथिलतां याति सर्वाधिव्याधयः क्षणात् २१ पूर्वं
भ्यस्तप्रयत्नेभ्यो विषमो यं हि संस्मृतः दुःसाध्यो वासनात्यागः सुमेरून्मूलनादपि २२ या
वद्विलीनं न मनो न तावद्वासनाक्षयः न क्षीणा वासना यावच्चित्तं तावन्न शाम्यति २३ यावन्न

तत्वविज्ञानंतावच्चित्तशमःकुतः यावन्नचित्तोपशमोनतावत्तत्ववेदनम् २४ यावन्नवासनाना।
शस्तावत्तत्वागमः कुतः यावन्नतत्वसंप्राप्तिर्नतावद्वासनाक्षयः २५ तत्वज्ञानंमनोनाशोवास
नाक्षयएवच मिथःकारणतांगत्वादुःसाध्यानिस्थितान्यतः २६ तस्माद्राघवयत्नेनपौरुषे
णाविवेकिना भोगेच्छांदूरतस्त्यक्त्वात्रयमेतत्समाश्रयेत् २७ सर्वएतेसमंयावन्नस्वभ्यस्ता
मुहुर्मुहुः तावन्नपदसंप्राप्तिर्भवत्यपिसमाशतैः २८ वासनासंपरित्यागसमंप्राणनिरोधन
म् विदुस्तत्वविदस्तस्मात्तदप्येवंसमाहरेत् २९ वासनासंपरित्यागाच्चित्तंगच्छत्यचित्तताम् प्रा
णस्पंदनिरोधाच्चयथेच्छसितथाकुरु ३० प्राणायामदृढाभ्यासैर्युक्त्याचगुरुदत्तया आसनाश
नयोगेनप्राणस्पंदोनिरुध्यते ३१ निःसंगव्यवहारित्वाद्भवभावनवर्जनात् शरीरनाशदर्शित्वा
द्वासनानप्रवर्तते ३२ वासनाविभवेनष्टेनचित्तंसंप्रवर्तते संशान्तेपवनस्पंदेयथापांसुर्नभ।
स्तले ३३ प्राणस्पन्दजयेयत्नःकर्तव्योधीमतोच्चकैः उपविश्योपविश्यैकचित्तकेनमुहुर्मु
हुः ३४ अथचेन्नक्रमंत्यक्त्वाचित्तंक्रमणमेवचेत् शक्नोतिनैनदाप्नोषिकालेनबहुनापदम् ३५
नशक्यतेमनोजेतुंविनायुक्तिमनिंदिताम् अंकुशेनविनामत्तंयथादुष्टमतंगजम् ३६ अध्या
त्मविद्याधिगमःसाधुसंगमएवच वासनासंपरित्यागःप्राणस्पन्दनिरोधनम् ३७ एतास्तायु
क्तयःपुष्टाःसन्तिचित्तजयेकिल याभिस्तज्जीयतेक्षिप्रं यथाताभिरिवभूरजः ३८ सतीषुयु
क्तिष्वेतासुहठान्नियमयन्तिये चेतस्तेदीपमुत्सृज्यविनिघ्नन्तितमोञ्जनैः ३९ कालयन्ता।

पोहानतीर्थदेवार्चनभ्रमैः विस्माथिशनैयेताद्विपयन्निम्नगाश्च ४० गछतस्तिष्ठतो वापि जाग्रतः स्व
पतोपिवा नविचारमयं चेतो यस्यासौ मृत उच्यते ४१ किमिदं स्याज्जगत्किं स्यादेहमित्यनिशं शा
उप॰प्र॰ नैः विचारयाध्यात्मदृशास्त्रं यं वासज्जनैः सह ४२ ज्ञानवान्नंदतानंदोनक्वचित्पविमज्जति ।
५९ जीवन्मुक्तोगतासंगः सम्राडात्मेव तिष्ठति ४३ जीवितस्यापि हन्तीवं दातारं चैव करूपया दृशा प्र
सादमाधुर्यशालिन्यापविपश्यति ४४ सदासमग्रपिहितवस्तुजालिसमाशयोप्यंतरक्षीनसत्त्वः
व्यापारमात्रात्सहजात्क्रमः स्यान्नकिंचिदप्यन्यदसौ करोति ४५ अथापदं प्राप्य सुसंपदं वा
महामतिः स्वमकृतेस्वभावं जहातिनोमन्दरवेल्लितोपिशौक्लं यथाक्षीरमयोम्बुराशिः ४६
59 संप्राप्य साम्राज्यमथापदं वा सरीसृपत्वं सुरनायतां वा तिष्ठत्यखेदोदयमस्तहर्षं ह्ययोदये
ष्विंदुर्विवेकरूपः ४७ निरस्तसंरम्भमथात्मभेदं प्रशान्तनानाफलवल्लवेषं विचारयात्मान
मदीनसत्त्वो यथाभवस्तुनमकाहनिष्टः ४८ तथोदितप्रसरविलासस्फुटयागतज्वरं पदम
वलम्ब्य यामलम् ॥ थियेहृयाडनदि हजन्मबन्धनेनैवध्यसेसमथिगतात्मरूपया ४९ इ
तिमात्तोपायेउपशमप्रकरणसारः नमोसत्ववसिष्ठाय त्रयोदशोदिवसः ॐ वाल्मीकिरुवाच
उपशमप्रकरणादनंतरमिदं शृणु त्वं निर्वाणप्रकरणं ज्ञाते निर्वाणं ह्यायियत् १ चतुर्दशेदि
मा वसे प्रातस्सभां आगतं रामं वसिष्ठ उवाच इदानीमवबोधार्थमन्यच्छृणु रघुमर्दन उच्यमानं मये
दं चम्रहरणशास्त्रं सिद्धये २ वैराग्याभ्यासवशमलयातत्वावबोधनात् संसारस्तीर्यते तेन । ५९

तेष्वेवाभ्याससमाहर ३ वैराग्याभ्यासवशतस्तथातत्त्वावबोधनात् संसारस्तीर्यतेतेन तेष्वेवाभ्या
ससमाहर ४ देहेयावदहंभावो दृश्येऽस्मिन्यावदात्मता यावन्ममेदमित्यास्था तावच्चित्तादिविभ्र
मः ५ यावन्नोदितमन्वेषु स्त्वंसज्जनासंगसंगतः यावन्मौर्ख्यं न संक्षीणं तावच्चित्तादिनिम्न
ता ६ यावदाशाविषामोदः परिस्फुरति हृद्वने अविचारचकोरेऽन्तर्नतावत्प्रविशत्यलम्
अमंगल्यमिवानास्यमवस्तुपरिपश्यतः दृश्यमिवदेहं स्वमसन्तं चित्तभूः कुतः ८ अनन्त
मेरवतयासर्वं चिद्व्योम्नि जगत्त्रयाम् ज्ञहतोऽन्तर्निवर्तन्ते मनश्चित्तादिविभ्रमाः ९ संरो
हतीषगुणाविद्धं यथापरशुनाग्निना नतज्ज्ञाग्निनिर्दग्धं प्रबोधविशदं मनः १० यएवातित
रांशत्रुः सत्वरस्मारणोद्यतः तमेवाकृत्रिमं मित्रं यः पश्यति स पश्यति ११ समूलकाषंक
षति नदीतटद्रुवद्रुमम् यः सोऽहंदेमत्सरं च सहर्षामर्षदोषहा १२ यस्यनाहंकृतोभावोबु
द्धिर्यस्यनलिप्यते हत्वापिसइमाँल्लोकान्नहन्ति न निबध्यते १३ अध्यात्मशास्त्रमंत्रेणात्
तृष्णाविषविषूचिका क्षीयते भाविते नान्तः शरदाभिहिंयथा १४ याः संपदो यदुनं संततमापद
श्चयद्यात्मयौवनजरामरणोपतापाः यन्मज्जने च सहस्वदुःखपरं पराभिरज्ञानतीव्रतिमि
रसाविभूततयस्ता १५ अविद्यां प्रकृतिं विद्धि गुणत्रितयधर्मिणीं सत्त्वं रजस्तमइति प्रत्येकं
भिद्यते गुणाः १६ नवधैवं विभक्तेयमविद्या गुणभेदतः यावत्किंचिदिदं दृश्यमनयैवतदा
श्रितम् १७ ऋषयो मुनयः सिद्धा नागा विद्याधराः सुराः इति भागमविद्यायाः सात्त्विकं वि

द्विवाद्यव १८ सात्विकस्यास्यभागस्यनामाविद्याथराजस्तमः रजस्तमसनयःसिद्धाःसर्वेदेवाद्
नि·प्र·
वादयः १९ अथयदिज्ञातश्चात्मैवभ्रमतोसमुपागतः ज्ञातश्चात्मत्वमायातिसीमान्तःसर्ववि
६·
विदाम् २० स्थावरादयएतेहिसमस्ताजडधर्मिणः हृष्णुमत्पदमारूढाजन्मयोग्याःपुनः
पुनः २१ यत्रास्तिवासनाबीजंतन्मध्येपुनरस्तिहृदये निर्बीजावासनायत्रतत्रार्थंसिद्धिदंस्मृतं २२
वासनायास्तथावह्नेर्ऋणव्याधिद्विषामपिस्नेहवैरविषाणांयःशेषःस्वल्पोपिवाधते २३
निर्दग्धवासनाबीजःसत्तासामान्यरूपवान् सदेहोवाविदेहोवानभूयोदुःखभाग्भवेत् २४
अविद्यारूपरहितायावदेवावलोक्यते तावदेवगलत्याशुतुहिनाराशिर्यथानले २५ रक्तमांसा
स्थिमयेत्रेस्मिन्कःस्यामहमितिस्वयं यावद्विचार्यतेतावत्सर्वमाशुविलीयते २६ आद्यन्ता-
योरसद्रूपेवर्तनयोरिहतेहृदा सर्वस्मिन्नेवयःशेषस्तमविद्याद्वयेविदुः २७ रूपंस्वना-
म्नापवास्याज्ञायतेनिःस्वभावकं नहिजिह्वागतरसास्वादोन्यस्मात्प्रतीयते २८ नाविद्या
घोचिदप्यास्तिव्रह्मैवेदमखण्डितम् सदसत्कलनास्फारमशेषंयेनमण्डितम् २९ घट
पटशकटावभासजालनविभुरितीमुदितेहसात्वविद्या घटपटशकटावभासजाले
विभुरितिचेत्कलितेवसात्वविद्या ३० पुनःपुनरिदंरामप्रबोधार्थंमयोच्यते अभ्यासेन
विनासाधोनाभ्युदेत्यात्मभावना ३१ त्वमविद्यालतामेतांप्ररूढांहृदयद्रुमे ज्ञानाभ्या
।। सविलासेनसियानिष्कृन्धिस्वात्मसिद्धये ३२ यथाविहरतिज्ञातज्ञेयोजनकभूपतिः आ
६·

त्मज्ञानाभ्यासपरस्तथा विहरस्व राघव ३३ निश्चयेन हरिर्येन विदिताचारकारिणा योनिश्चयवतस्तुर्व्यां
तनस्त्वत्वमुदाहृतम् ३४ निश्चयो यस्त्रिनेत्रस्य कान्तया सह तिष्ठतः ब्रह्मणो वाप्यरागस्य सतेभ
वत्तु राघव ३५ यो निश्चयः सुरगुरोर्वाक्पतेर्भार्गवस्य च दिवाकरस्य शशिनः पवनस्यानलस्य
च ३६ नारदस्य पुलस्त्यस्य मम चाङ्गिरसस्तथा प्रचेतसो भृगोश्चैव क्रतोरत्रेः शुकस्य च ३७
अन्येषामेव विप्रेन्द्र राजर्षीणां च राघव यो निश्चयो विमुक्तानां जीवतामेभवत्वसौ ३८ ब्रह्मचिद्ब्र
ह्मभुवनं ब्रह्मभूतपरम्परा ब्रह्माहं ब्रह्म मच्छत्रुर्ब्रह्म मन्मित्रबान्धवाः ३९ अज्ञस्य दुःखौघ
मयं ज्ञस्यानन्दमयं जगत् अन्धं भुवनमन्धस्य प्रकाशं तु सचक्षुषः ४० यः करणो या च करणी
कायावीचिर्यस्तरङ्गकः यः फेनो या च लहरी तद्यथा वारि वारिणि ४१ यो देहो या च कलमाय
हृश्पेयोन्वयाह्वयो याभावरचना यार्थस्तथा तद्ब्रह्म ब्रह्मणि ४२ अकर्मकर्तृकरणमकारण
मनामयं स्वयंप्रभं महात्मानं ब्रह्म ब्रह्मविदो विदुः ४३ अहं रक्तमहं मांसमहमस्थीन्यहं वपुः
चिदहं चेतनं चाहं ब्रह्माहमिति सत्यता ४४ व्योमाहं खमहं सार्कमहमाशाभुवोऽप्यहम् अहं घ
टपटाकारो ब्रह्माहमिति सत्यता ४५ सर्वसंकल्पफलदं सर्वतेजःप्रकाशकं सर्वोपादेयसी
मान्तं चिदात्मानमुपास्महे ४६ सर्वावयवविश्रान्तं समस्तावयवातिगं अनारतकचद्रूपं चि
दात्मानम्· ४७ घटपटेतटेरूपे स्पन्दमानं सदा तनौ जाग्रत्यपि सुषुप्तस्थं चिदात्मानम्· ४८
उष्णमग्नेतौ हिमे शीतं मृष्टमन्ने शितं क्षुरे कृष्णं ध्वान्ते सितं चन्द्रे चिदा· ४९ आलोकं बहिरन्त

नि॰ प्र
६१

61

स्थस्थितश्च स्वात्मवल्लनि अहं समपि हृदयस्थं चिदा॰ ५॰ माधुर्यादिषु माधुर्यं तीक्ष्णादिषु च तीक्ष्णताम्।
गतं पदार्थजातेषु चिदात्मानमुपा॰ ५१ आग्रत्स्वप्नसुषुप्तेषु तुर्यातुर्यातिगे पदे समं सदैव सर्वत्र विश्रा
५२ प्रशान्तसर्वसंकल्पं विगताखिलकौतुकम् विगताशेषसंरम्भं चिदात्मानमुपा॰ ५३ निःकौतु
के निरारम्भं निरीहं सर्वमेव च निरंशं निरहंकारं चिदा॰ ५४ सर्वस्यान्तःस्थितं सर्वं मयमपि वैकरू
पिणं अपर्यन्तचिदारम्भं चिदात्मानमुपागतः ५५ अखिलमिदमहं ममैव सर्वं त्वमहमपि नाहं
मथ तव त्वं नाहम् इति विदितवतो जगन्त्वतमेस्थिरमथवाऽस्तगतज्वरो भवामि ५६ इति नि
श्चयवन्तस्ते महात्मानो विगतैनसः सत्यासत्यपदे शान्ते सममस्तु स्वमवस्थिताः ५७ इति दृशीथि
योधीराः समनीरागवितमः नानन्दन्ति न नन्दन्ति जीवितं मरणं तथा ५८ मनन्कुर्नी विमोहेषु नम
मज्जन्ति विपत्कर्मेः न जहर्षुः शुभैः शोके रुदन्नं भवन्तिव ५९ प्रकृताचारसंप्राप्तं कुर्वन्तः कर्म।
केवलं स्थिताविगतसंरंभमपराङ्वमेरवः ६० नात्वदृष्टिमवष्टभ्य रागद्वेषविनाशिनीम् अ
नहंकृत्यहंकारो विहरस्व यथाक्रमम् ६१ श्रीरामः सम्यज्ज्ञानविलासेन वासनाविलयोदये
जीवन्मुक्तपदे ब्रह्मन्न विश्रान्तवानहम् ६२ प्राणस्पन्दनिरोधेन वासनाविलयोदये जीव
न्मुक्तपदे ब्रह्मन्वद विश्राम्यते कथम् ६३ वसिष्ठः असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्च
यः ममत्वभिमतः साधो सुसाध्यो ज्ञाननिश्चयः ६४ प्राणापानतया हृद्योर्हढदेहगुहाशयः अ
नन्तसिद्धिदः साधो योगोऽयं बुद्धिदः शृणु ६५ मेरोः पद्मरागमयईशानकोणोद्भूतनामकल्प।

नरुमल्लिकेकलयोतललताप्रान्तदृशिगारकन्धकोटवालयस्य भुशुण्डकाकस्य शश्चिरंजीवी नभ्र।
तोन भविष्यतीति वचने चिरंजीविकथाप्रसंगाद् इन्द्र इष्ट शातातप मन्युक्तमिन्द्रसभायां श्रुत्वा
भुशुण्डालयं गतेनाभुशुण्डः अथ्याय संकल्पजकवाभ्याम् अर्घ्यादिपुष्पाञ्जलिसमर्पणपर्यन्त
सपर्ययासादरं समर्च्य स्वदत्तकल्पतरुदलासनगतो मोहार्दान्मधुवाग्भिरेवुवाच अहो भगवता
स्माकं प्रसादो दर्शितश्चिरात् दर्शनामृतसेकेन यत्सिक्ताः स्तद्रुमा वयम् ६५ मत्पुरा पचिरसंभा
